# Agastikritam Skanda Stotram

# अगस्तिकृतं स्कन्दस्तोत्रम्

## Document Information

Text title : Agastikritam Skanda Stotram

File name : agastikRRitaMskandastotram.itx

Category : subrahmanya, skandapurANa, stotra, aShTaka

Location : doc_subrahmanya

Proofread by : PSA Easwaran

Description/comments : skandapurANa | kAshIkhaNDa | pUrvakhaNDa | adhyAya 25/10-17||

Latest update : June 9, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 9, 2025

*sanskritdocuments.org*

# अगस्तिकृतं स्कन्दस्तोत्रम्

अगस्तिरुवाच ।
नमोऽस्तु वृन्दारकवृन्दवन्द्य पादारविन्दाय सुधाकराय ।
षडाननायामितविक्रमाय गौरीहृदानन्दसमुद्भवाय ॥ १॥

नमोऽस्तु तुभ्यं प्रणतार्तिहन्त्रे कर्त्रे समस्तस्य मनोरथानाम् ।
दात्रे रथानां परतारकस्य हन्त्रे प्रचण्डासुरतारकस्य ॥ २॥

अमूर्तमूर्ताय सहस्रमूर्तये गुणाय गुण्याय परात्पराय ।
अपारपाराय परापराय नमोऽस्तु तुभ्यं शिखिवाहनाय ॥ ३॥

नमोऽस्तु ते ब्रह्मविदांवराय दिगम्बरायाम्बरसंस्थिताय ।
हिरण्यवर्णाय हिरण्यबाहवे नमो हिरण्याय हिरण्यरेतसे ॥ ४॥

तपःस्वरूपाय तपोधनाय तपःफलानां प्रतिपादकाय ।
सदा कुमाराय हिमारमारिणे तृणीकृतैश्वर्यविरागिणे नमः ॥ ५॥

नमोऽस्तु तुभ्यं शरजन्मने विभो प्रभातसूर्यारुणदन्तपङ्क्तये ।
बालाय चाबालपराक्रमाय षाण्मातुरायालमनातुराय ॥ ६॥

मीढुष्टमायोत्तरमीढुषे नमो नमो गणानां पतये गणाय ।
नमोऽस्तु ते जन्मजरातिगाय नमो विशाखाय सुशक्तिपाणये ॥ ७॥

सर्वस्य नाथस्य कुमारकाय क्रौञ्चारये तारकमारकाय ।
स्वाहेय गाङ्गेय च कार्तिकेय शैवेय तुभ्यं सततं नमोऽस्तु ॥ ८॥

इत्थं परिष्टुत्य स कार्तिकेयं नमो नमस्त्वित्यभिभाषमाणः ।
द्विस्त्रिःपरिक्रम्य पुरो विवेश स्थितो मुनीशोपविशेति चोक्तः ॥ ९॥

इति श्रीस्कादपुराणे काशीखण्डे पूर्वार्द्धे पञ्चविंशाध्यायान्तर्गतं
अगस्तिकृतं स्कन्दस्तोत्रं समाप्तम् ।

स्कन्दपुराण । काशीखण्ड । पूर्वखण्ड १ । अध्याय २५/१०-१७॥

skandapurANa . kAshIkhaNDa . pUrvakhaNDa 1 . adhyAya 25/10-17..

Proofread by PSA Easwaran

*Agastikritam Skanda Stotram*

pdf was typeset on June 9, 2025

Please send corrections to *sanskrit@cheerful.com*